३७७. जमदग्निर्भार्गवः । नित्यद्विपदा गायत्री । पवमानस्सोमः ॥

११६०. पवस्व सोम मन्दयन्निन्द्राय मधुमत्तमः ॥१॥

११६१. ते सुतासो विपश्चितश्शुक्रावायुमसृक्षत ॥२॥

११६२. असृग्रं देववीतये वाजयन्तो रथा इव ॥३॥

धा. ८. ड. न. स्व. न. रौ. ॥९७॥

चतुर्थः खण्डः ॥

३७८. परुच्छेपो दैवोदासिः । अत्यष्टिः । अग्निः ॥

११६३. अग्निꣳहोतारं मन्ये दास्वन्तं वसोः सूनुं सहसो जातवेदसं विप्रं
न जातवेदसम् । य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा ।
घृतस्य विभ्राष्टिमनु शुक्रशोचिष आजुह्वानस्य सर्पिषः ॥१॥

---

३७७. पवस्व । सोम । मन्दयन् । इन्द्राय । मधुमत्तमः । ते ॥ सुतासः । विपश्चितः । विपः । चितः । शुक्राः । वायुम् । असृक्षत ॥ असृग्रम् । देववीतये । देव । वीतये । वाजयन्तः । रथाः । इव ॥

---

अग्नोजसाकिनाइम् । शुषाऽ२भाऽ२३४वात् ॥ आरोदसीअपृणदस्यमज्मना ।
प्रवाऽ२वाऽ२३४द्धोइ ॥ अधश्चान्यंजठरेप्रेमरिच्यता । प्रचाऽ२इता-
ऽ२३४या ॥ सैनꣳसश्चदेवोदेवꣳसत्पइन्दुः । सत्पाऽ२माऽ२३४इन्द्राम् ॥
चराचरायबृहतइदंधाममिदम्बृहद्धस् ॥ द्वी. २९. ड. १. मा. २५. तु. ॥९७॥

१०. [1]स्वाशिरामर्कः ॥ स्वाशिराः । गायत्री । पवमानस्सोमः ॥

अयामायाम् । परिसुवाऽ२ । नोगाइराऽ२३४इष्ठाः ॥ पवित्रेसोऽ२ ।
मोअक्षाऽ२३४रात् ॥ श्रीः ॥ तुवम्विप्राऽ२ः । तुवंकाऽ२३४वीः ॥ मधु-
प्रजाऽ२ । तमन्धाऽ२३४साः ॥श्रीः॥ तुवेविश्वेऽ२ ॥ सजोषाऽ२३४साः ॥
देवासꣳपाऽ२इ । तिमाशाऽ२३४ता ॥ मदेषुसाऽ२ । वेधाआऽ२३४साइ ॥
ईऽ२३४५ ॥ द्वी. ८. ड. न. मा. ११. रि. ॥९८॥

चतुर्थी दशतिः ॥

---

[1] पञ्चचत्वारिंशद्बहुलरथन्तरसूक्ते गीयते ।

११६४. यजिष्ठं त्वा यजमाना हुवेम ज्येष्ठमङ्गिरसां विप्र मन्मभिर्विप्रेभि
शुक्र मन्मभिः । परिज्मानमिव द्याᳩहोतारं चर्षणीनाम् । शोचि-
ष्केशं वृषणं यमिमा विशःᳲप्रावन्तु जूतये विशः ॥२॥

११६५. स हि पुरू चिदोजसा विरुक्मता दीद्यानो भवति द्रुहन्तरःᳲपरशुर्न-
द्रुहन्तरः । वीडु चिद्यस्य समृतौ श्रुवद्वनेव यत्स्थिरम् । निष्षह-
माणो यमते नायते धन्वासहा नायते ॥३॥

धा. ४३. उ. २. स्व. ४. ठी. ॥१८॥

नवमप्रपाठकस्य द्वितीयोऽर्धः ॥

२७९. अग्निः पावकः । पङ्क्तिः । अग्निः ॥

११६६. अग्ने तव श्रवो वयो महि भ्राजन्ते अर्चयो विभावसो ।
बृहद्भानो शवसा वाजमुक्थ्यं३ दधासि दाशुषे कवे ॥१॥

---

२७८. अग्निम् । होतारम् । मन्ये । दास्वन्तम् । वसोः । सूनुम् । सहसः । जातवेदसम् । जात । वेदसम् । विप्रम् । वि । प्रम् । न । जातवेदसम् । जात । वेदसम् । यः । ऊर्ध्वया । स्वध्वरः । सु । अध्वरः । देवः । देवाच्या । कृपा । घृतस्य । विभ्राष्टिम् । वि । भ्राष्टिम् । अनु । शुक्रशोचिषः । शुक्र । शोचिषः । आजुह्वानस्य । आ । जुह्वानस्य । सर्पिषः ॥ यजिष्ठम् । त्वा । यजमानाः । हुवेम । ज्येष्ठम् । अङ्गिरसाम् । विप्र । वि । प्र । मन्मभिः । विप्रेभिः । वि । प्रेभिः । शुक्र । मन्मभिः । परिज्मानम् । परि । ज्मानम् । इव । द्याम् । होतारम् । चर्षणीनाम् । शोचिष्केशम् । शोचिः । केशम् । वृषणम् । यम् । इमाः । विशः । प्र । अवन्तु । जूतये । विशः ॥ सः । हि । पुरु । चित् । ओजसा । विरुक्मता । वि । रुक्मता । दीद्यानः । भवति । द्रुहन्तरः । द्रुहम् । तरः । परशुः । न । द्रुहन्तरः । द्रुहम् । तरः । वीडु । चित् । यस्य । समृतौ । सम् । ऋतौ । श्रुवत् । वना । इव । यत् । स्थिरम् । निष्षहमाणः । निः । सहमानः । यमते । न । अयते । धन्वासहा । धन्वा । सहा । न । अयते ॥